National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(67): 164-167
© 2026 NJHSR
www.sanskritarticle.com

**आनन्दमोहन सिंहः**
शोधच्छात्रः, विशिष्टाद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली-16

**Correspondence:**
**आनन्दमोहन सिंहः**
शोधच्छात्रः, विशिष्टाद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली-16

# भक्तिप्रपत्त्योः प्राशस्त्यप्रतिपादनपूर्वकं वेदान्तदेशिकप्रणीत-न्यासदशकस्तोत्रग्रन्थस्य परिचयः

**आनन्दमोहन सिंहः**

श्रीवेदान्तदेशकः श्रीवेङ्कटनाथः भगवद्भक्तिपरिपूर्णः आचार्यः। सः स्वेन प्रणीतासु स्तुतिषु स्तोत्रग्रन्थेषु च न केवलं भगवतः स्वरूपं, तस्य अनन्तकल्याणगुणगणान्, तद्विभूतीः, अपहतपाप्मत्वादीन् गुणान् वा वर्णयति, अपि तु भगवान् सर्वेषां जीवात्मनां मोक्षप्रदाता, विशेषतः स्वाश्रितानां रक्षकः, शरणागतवत्सलः, दयासागरश्च इति तत्त्वमपि पुनः पुनः प्रतिपादयति। भगवतः आश्रितवात्सल्यम् अनन्तम्। यः कश्चित् भगवन्तं शरणमाश्रयति, तस्य रक्षणं भगवान् स्वकीयकर्तव्यतया स्वयमेव स्वीकरोति। अत एव भगवान् शरणागतवत्सलः इति विशेषेण प्रसिद्धः। वेदेष्वपि बहुशोऽयं विषयः प्रतिपादितः दृश्यते।

भगवत्प्राप्तये ज्ञानं परमं साधनमिति शास्त्रे प्रतिपाद्यते।[1] किन्तु तज्ज्ञानं केवलं सामान्यज्ञानरूपं न भवति; भगवद्विषयकप्रेमविशेषरूपेण परिणतं ज्ञानमेव भक्तिरूपतां प्राप्नोति।[2] भगवद्विषयकं ज्ञानं यदा निरन्तरानुसन्धानरूपं भवति, तदा तत् भक्तिस्वरूपं भवति[3]। केवलं वाक्यजन्यं भगवद्विषयकं यथार्थज्ञानं मोक्षाय पर्याप्तं न भवति; तस्य ज्ञानस्य भगवति निरन्तरप्रेमपूर्वकानुध्यानरूपेण प्रवाहः आवश्यकः। सर्वेषां प्राणिनां जीवनस्य परमाभिलाषः सुखप्राप्तिरेव। सुखी एव स्याम् इति आशा सर्वेषां प्राणिनां स्वाभाविकी। किन्तु नित्यं निर्विघ्नं परमं सुखं केवलं भगवत्प्राप्त्या एव लभ्यते।

भगवद्गीतायां भगवान् स्वस्य भक्तानां चतुर्विधं विभागं प्रतिपादयति, यथा- आर्तः, जिज्ञासुः, अर्थार्थी, ज्ञानी च।[4] एतेषु ज्ञानी भक्तः भगवान् प्रति अनन्यभक्तियुक्तः भवति।[5] शास्त्रे जीवस्य प्रयोजनानुसारं बुभुक्षु-मुमुक्षुभेदेन द्विविधो विभागोऽपि प्रतिपादितः। बुभुक्षुः संसारविषयकफलान् इच्छति, मुमुक्षुः तु संसारबन्धनात् विमुक्तिं भगवत्प्राप्तिं च इच्छति। मुमुक्षवोऽपि मुख्यतया द्विविधाः भवन्ति, भक्ताः प्रपन्नाश्च। भक्तियोगमार्गेण भगवन्तं प्राप्तुमिच्छन् जीवः भक्तिमार्गं स्वीकरोति, अन्यः तु भगवन्तमेव उपायभूतं स्वीकृत्य प्रपत्तिमार्गं अनुसरति।

भक्तिमान् जीवः भक्तियुक्तः, भक्तिसम्पन्नश्च भवति। मोक्षप्रकरणे भगवद्विषयिणी भक्तिः एव मोक्षस्य साधनं भवति। सा भक्तिः श्रीमन्नारायणपरा भवितव्या। यदा जीवः अन्यफलान् कामयमानः देवतान्तरमुपासते, तदा तस्य उपासना मोक्षप्राप्तेः साक्षात् साधनं न भवति। देवतान्तराणाम् आराधनया यत् किञ्चित् फलम् उपलभ्यते, तदपि परमात्मना श्रीमन्नारायणेनैव प्रदीयते।[6] देवतान्तराणि तु तस्य भगवतः अधीनानि। अतः देवतान्तराराधनया प्राप्तं फलं अल्पं, क्षयि च भवति। भगवद्गीतायां देवतान्तरभक्तेः फलस्य अल्पत्वं तथा तस्य क्षयित्वं स्पष्टतया प्रतिपादितम्।[7]

श्रीमन्नारायणमुद्दिश्य, तस्य प्रीत्यर्थं, तस्याराधनरूपेण यत् कर्मानुष्ठानं क्रियते, तत् तु भगवत्सम्बन्धात् विशेषमहत्त्वं प्राप्नोति। भगवदर्थं कृतं कर्म भगवदर्पणबुद्ध्या समर्पितं भवति।[8] अतः तस्य फलस्य क्षयित्वं न भवति। भगवत्सम्बन्धेन कर्मणः स्वरूपमेव परिवर्तते। कर्मफलाभिसन्धिरहितं भगवदर्पणपूर्वकं कृतं कर्म जीवस्य अन्तःकरणशुद्धिं जनयति, भगवद्विषयकज्ञानस्य च वृद्धिं करोति।

भक्तेः स्वरूपं विचारयता सा भगवति महति विषये उत्पद्यमाना प्रीतिः इति वक्तुं शक्यते।[9] भगवतोऽनन्तकल्याणगुणानां ज्ञानपूर्वकं तस्मिन् जायमाना परमप्रीतिः एव भक्तिः।

सा केवलं क्षणिकभावना न, अपि तु प्रेमपूर्वकम् अनुध्यानम्। भगवति श्रीमन्नारायणे निरन्तरं प्रेमपूर्वकं मनसः प्रवाहः भक्तिः। सा भक्तिः परमप्रेमरूपा, अमृतस्वरूपा च भवति।[10] भक्तस्य मनः भगवति एव निरन्तरं प्रवर्तते। तस्य स्मरणं, ध्यानं, चिन्तनं च भगवद्विषयकमेव भवति।

अतः भगवान् भाष्यकारः श्रीरामानुजाचार्यः, यः विशिष्टाद्वैत-वेदान्तसिद्धान्तस्य प्रतिष्ठापकाचार्यः, सः श्रीभाष्ये भक्तेः स्वरूपं विस्तरेण प्रतिपादितवान्। भक्तेः ये ये लक्षणविशेषाः शास्त्रेषु प्रतिपादिताः, तान् सर्वान् आत्मसात्कृत्य श्रीरामानुजाचार्यस्य सिद्धान्ते भक्तिः विशिष्टस्वरूपेण प्रतिष्ठिता। भक्तिः स्मृतिसन्तान-रूपा। भगवद्विषयकं स्मरणं यदा एकवारं जात्वा समाप्तं न भवति, किन्तु पुनः पुनः भगवद्विषयकस्मृत्या निरन्तरप्रवाहं प्राप्नोति, तदा सा भक्तिरूपतां गच्छति।

लौकिकदृष्टान्तेन तैलधारावत् अविच्छिन्नः प्रवाहः स्मृतिसन्तानस्य स्वरूपं बोधयति। यथा एकस्मिन् पात्रात् अन्यस्मिन् पात्रे तैलस्य धारया अविच्छिन्नरूपेण पतनं भवति, तथा भगवद्विषयकं स्मरणं मध्ये विच्छेदं विना निरन्तरं प्रवर्तते। एतादृशः भगवदनुध्यानप्रवाहः भक्तिः।[11] अत एव वेदेषु, उपनिषत्सु, स्मृतिषु, इतिहासपुराणेषु च भक्तिः ध्यानम्, ध्रुवस्मृतिः, निदिध्यासनम्, उपासना इत्यादिभिः विविधैः पदैः प्रतिपादिता दृश्यते। एतेषां पदानां स्वरूपतः भेदः क्वचित् दृश्यतेऽपि, भगवद्विषयकनिरन्तरचिन्तनस्य साधनत्वे तेषां परस्परं साम्यं शास्त्रेषु सुविचारितं प्रतिष्ठापितं चास्ति।

भक्तिः साधनभूतैः विविधैः साधनैः जन्यते। यमः, नियमः, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिश्च इत्येते अष्टाङ्गयोगस्याङ्गानि। एतैः सहकृतया भक्तेः साधना भवितुमर्हति। अष्टाङ्गयोगेन चित्तस्य स्थैर्यं, इन्द्रियाणां निग्रहः, अन्तःकरणस्य प्रसादश्च जायते। तेन भगवद्विषयकध्यानस्य निरन्तरता सुलभा भवति। पुरुषसूक्तेऽपि ध्यानातिरिक्तस्य उपायस्य निषेधपूर्वकं ध्यानस्य महत्त्वं प्रतिपाद्यते।[12] ध्यानादेव मृत्युम् अतिक्रम्य अमृतत्वस्य प्राप्तिः सम्भवतीति वेदवाक्येषु प्रतिपादितम्।[13]

एवं भक्तिरूपापन्नस्य भगवद्विषयकज्ञानस्य महत्त्वं शास्त्रेष्वनेकत्र प्रतिपादितम्। भक्तियोगः मोक्षस्य साधनम् इति स्वीकृते सति पुनः प्रश्नः उदेति- यदि भक्तिरेव मोक्षस्य साधनं भवति, तर्हि प्रपत्तेः प्रयोजनं किम्? प्रपत्तेः मोक्षसाधनत्वं कथं सम्भवति? भक्तियोगस्य विद्यमानत्वे प्रपत्तिमार्गस्य आवश्यकता किमर्थम्?

अस्य प्रश्नस्य समाधानं श्रीवैष्णवसम्प्रदायस्य सिद्धान्तेऽत्यन्तं सूक्ष्मतया प्रतिपादितम्। सम्यग्विचारेण ज्ञायते यत् प्रपत्तिरपि भक्तेः एकं विशेषस्वरूपम्, तथा च अत्यन्तलघूपायः। भक्तियोगः दीर्घकालं साधनीयः, विविधसाधनसहकृतः, चित्तैकाग्र्याद्यपेक्षायुक्तश्च भवति। प्रपत्तिस्तु भगवति सम्पूर्णनिर्भरता। साधनभक्तौ जीवः स्वकीय-साधनशक्त्या दीर्घकालं भगवदनुसन्धानं करोति। तत्र भगवान् साध्यः, भक्तिः साधनम्। प्रपत्तौ तु जीवः स्वस्य सामर्थ्याभावं स्वीकृत्य भगवान्तमेव उपायभूतं स्वीकरोति। अतः तत्र साध्यं भगवान्, साधनमपि भगवान् एव।

एष एव भक्तियोग-प्रपत्त्योः प्रमुखो विशेषः। भक्तिमार्गे भगवत्प्राप्तिः साध्यं, भक्तिः साधनम्। प्रपत्तिमार्गे भगवत्प्राप्तिरपि भगवतः कृपया, भगवानेव च तस्याः प्राप्तेः उपायः। जीवस्य कर्तव्यं तु भगवतः शरणागमनम्, स्वस्य आत्मनः समर्पणं, भगवानेव रक्षकः इति महाविश्वासधारणं च।

अतः ज्ञानिनः, विशेषतः स्वसामर्थ्यस्य मर्यादां ज्ञातवन्तः मुमुक्षवः, दीर्घकालसाध्यभक्तियोगापेक्षया प्रपत्तिमेव अनुष्ठातुं प्रयतन्ते। भक्तिः आप्रयाणपर्यन्तं कर्तव्या। शरीरावसानपर्यन्तं सा भक्तिः पुनः पुनः अनुष्ठेया। भगवद्विषयकस्मरणप्रवाहस्य विच्छेदः न कर्तव्यः। प्रपत्तिस्तु तादृशी न। प्रपत्तिः आचार्यमुखेन, भगवन्मुखेन, अथवा स्वयमेव सकृत्, अर्थात् एकवारमेव, अनुष्ठेया। एकवारं कृतया प्रपत्त्या जीवः स्वस्य रक्षणभारं भगवति समर्पयति।

प्रपत्तेः सकृदनुष्ठेयत्वेनऽन्येषां वैदिककर्मणाम् अकर्तव्यता न सूच्यते। प्रपन्नः काम्यकर्माणि परित्यजेत्, किन्तु नित्यनैमित्तिकानि वैदिक-कर्माणि फलाभिसन्धिं विना अनुष्ठेयानीति शास्त्रसम्मतम्। निषिद्ध-कर्मणां परित्यागः आवश्यकः। नित्यकर्माणि भगवदर्पणबुद्ध्या, भगवत्प्रीत्यर्थं, निष्कामभावेन चानुष्ठेयानि। सर्वमपि कर्म भगवदर्पण-मुखेन निष्कामतया अनुष्ठेयम् इति भावः प्रपन्नजीवनस्य महत्त्वपूर्णः आधारः।

प्रपत्तिः सुकरा इति प्रसिद्धा। किन्तु तस्याः सुकरत्वमेव दृष्ट्वा सा सर्वथा दुष्करा नास्ति इति वक्तुं न शक्यते। प्रपत्तेः अनुष्ठानं बाह्यदृष्ट्यात्यन्तं सरलम्। किन्तु तस्याः अन्तर्गताः भावाः-विशेषतः महाविश्वासः, आकिञ्चन्यम्, अनन्यगतित्वम्, आत्मसमर्पणम्,सर्वेषां जनानां कृते सहजतया साध्याः न भवन्ति। अतः प्रपत्तिः एकतः सुकरा, अन्यतः दुष्करा इति उभयथा प्रतिपाद्यते।[15]

प्रपत्तेः षडङ्गत्वं प्रसिद्धम्। भगवद्विषयकानुकूल्यस्य सङ्कल्पः, भगवदभिमतप्रातिकूल्यस्य वर्जनम्, भगवान् नूनं रक्षयिष्यतीति महान् विश्वासः, भगवन्तं गोप्तृत्वेन वरणम्, स्वस्य अकिञ्चनत्वस्य भावः, आत्मसमर्पणम् इति प्रपत्तेः अङ्गानि ।[16] प्रपन्नेन एतानि अङ्गानि केवलं शब्दरूपेण न, किन्तु भावपूर्वकं स्वीकर्तव्यानि।

प्रथमम् आनुकूल्यसङ्कल्पः भगवतः यत् प्रियं, यदभिमतं, यत् शास्त्रसम्मतं च तत् अहं करिष्यामि इति दृढसङ्कल्पः। द्वितीयं प्रातिकूल्यवर्जनम्, भगवदभिमतस्य विपरीतं, भगवदाज्ञाविरुद्धं, शास्त्रनिषिद्धं च कर्म न करिष्यामि इति सङ्कल्पः। तृतीयं महाविश्वासः भगवान् एव मां रक्षिष्यति, तस्य रक्षणे न कदापि विघ्नः सम्भवति इति दृढविश्वासः। चतुर्थं गोप्तृत्ववरणम्, भगवन्तमेव स्वस्य रक्षकत्वेन वरणम्। पञ्चमम् आकिञ्चन्यम्, मम स्वकीयसामर्थ्येन मोक्षप्राप्तावुपायानुष्ठानं कर्तुं सामर्थ्यं नास्ति इति भावः। षष्ठम् आत्मसमर्पणम्, आत्मानं सम्पूर्णतया भगवति समर्पयितुं भावः।

एवमेव प्रपत्तेः स्वरूपविश्लेषणपराणि अन्यान्यपि पद्यानि शास्त्रेषु सन्ति। पूर्वाचार्यैः प्रपत्तेः स्वरूपं, अङ्गानि, अधिकारः, फलम्, अनुष्ठानक्रमश्च विविधेषु ग्रन्थेषु प्रतिपादितः। तेषां परम्परायामेव श्रीवेदान्तदेशिकः न्यासदशके प्रपत्तितत्त्वं सुबोधतया, गम्भीरतया, शास्त्रीयरीत्या च प्रतिपादितवान्।

साधनभक्तिमार्गे रतः जीवः यदि योगभ्रष्टो भवति, तर्हि तस्य पूर्वजन्मसञ्चिता भक्तिवासना नश्यति न। सा वासना जन्मान्तरेऽपि तस्यान्तःकरणे पुनः जागरूकतां प्राप्नोति। भगवद्गीतायां ध्यानयोगाध्याये योगभ्रष्टस्य जन्मान्तरे श्रीमतां गेहे अथवा योगिनां गेहे जन्मप्राप्तिः प्रतिपादिता। पूर्वदेहिकबुद्धिसंस्कारस्य दार्ढ्यात् सः पुनः पूर्वसाधनमार्गं प्रति प्रवर्तते।[17] अनेन भक्तिसाधनस्य संस्काररूपेण अनुवर्तनं प्रतिपादितम्।

सुदृढं भवतीति प्रतिपादितम्।

प्रपत्तेः स्थितिः तु अत्र भिन्ना। प्रपन्नस्य प्रपत्त्यनुष्ठानं तस्य जीवनस्यात्यन्तमहत्त्वपूर्णं कृत्यम्। सः यदि भगवदनुग्रहात् भ्रष्टः भवेत्, तर्हि तस्य दोषोऽत्यन्तगम्भीरः भवति। अतः प्रपत्तेरनुष्ठानस्य, तस्य फलस्य, भगवद्भारसमर्पणस्य च संरक्षणदृष्ट्या प्रपत्तिः दुष्करा इत्यपि कथ्यते। विशेषतः महाविश्वासस्य दृढता, आत्मसमर्पणस्य वास्तविकता, भगवदेकशरणत्वस्य स्थैर्यं च अत्यन्तं महत्त्वपूर्णम्।

प्रपत्तिविद्या पूर्वकाले अत्यन्तगोपनीया आसीत्। वेदेष्वपि प्रपत्तितत्त्वस्य निर्देशः स्यात्, तथापि तस्य रहस्यस्वरूपं सर्वसामान्येषु न प्रकाश्यते स्म। आचार्यपरम्परया प्रपत्तिविद्या संरक्षिता आसीत्। रहस्यत्रयादिषु ग्रन्थेषु प्रपत्तेरत्यन्तगूढं स्वरूपं प्रतिपादितम्। किन्तु लोककल्याणदृष्ट्या बहवः आचार्याः प्रपत्तेः माहात्म्यं जनसामान्येष्वपि प्रकाशयितुं प्रवृत्ताः। सर्वे जन्तवः भगवन्मुक्तिभाजः भवन्तु इति करुणापूर्णया भावनया ते शिष्येभ्यः प्रपत्तिविद्यां उपदिशन्तः, भगवति शरणागतिक्रमं प्रकाशयन्तश्चासन्।

तेषु आचार्येषु श्रीनिगमान्तमहादेशिकः श्रीवेङ्कटनाथः अन्यतमः। सः केवलं स्तोत्रग्रन्थेषु एव न, अपि तु शास्त्रग्रन्थेष्वपि प्रपत्तेः माहात्म्यं, तस्य अनुष्ठानविधिं, तस्य अधिकारिविशेषं, तस्य फलस्वरूपं च विस्तरेण प्रतिपादितवान्। प्रपत्तिमार्गस्य विषये मतान्तरैः कृतानाम् आक्षेपाणां तर्कैः, युक्तिभिः, प्रमाणैः च समाधानं कृत्वा शास्त्रसम्मतं सिद्धान्तं दृढतया प्रतिष्ठापितवान्।

श्रीवेदान्तदेशिकस्य बहुषु स्तोत्रग्रन्थेषु प्रपत्तितत्त्वस्य विविधाः पक्षाः प्रतिपादिताः सन्ति। तेषु न्यासदशकमप्यत्यन्तं महत्त्वपूर्णम्। नामतः एव अस्य विषयः स्पष्टः भवति। न्यासः इति आत्मसमर्पणम्, भारसमर्पणम्, भगवति रक्षणभारस्य निक्षेपश्च। दशकम् इति दशश्लोकात्मकः ग्रन्थः। अयं ग्रन्थः अनुप्रासादिभिः अलङ्कारैः समन्वितः, अनुष्टुप्छन्दसा निबद्धः, आकारतः लघुः, किन्तु अर्थगाम्भीर्यतोऽत्यन्तविपुलश्चास्ति ।

न्यासदशकस्य दशसु श्लोकेषु प्रपत्तेः तत्त्वं क्रमशः विकसितं दृश्यते। प्रथमं जीवः स्वस्य स्वरूपं ज्ञात्वा स्वस्य रक्षणभारं भगवति समर्पयति। अनन्तरं प्रपत्तेः अङ्गानि स्वीकुर्वन् भगवन्तमेव रक्षकत्वेन वरणं करोति। ततः स्वस्य कर्तृत्व-ममत्व-फलाभिसन्धीनां परित्यागं कृत्वा भगवत्सम्बन्धं दृढीकरोति। भगवत्प्राप्तिः एव परमपुरुषार्थः इति स्वीकृत्य देहावसानकाले भगवत्पादप्राप्तिं प्रार्थयति। तदनन्तरं भगवच्छेषत्वे स्थिरबुद्धिं तथा नित्यकैङ्कर्यस्य अभिलाषं प्रकटयति। आत्मीयस्य सर्वस्य वस्तुनः भगवत्कैङ्कर्योपकरणत्वं स्वीकृत्य, पापप्रवृत्तिनिवारणं, अपराधक्षमा च याचते। अन्ते भगवति पूर्णनिर्भरभावं प्राप्नोति।

अतः न्यासदशकं केवलं प्रपत्तेः विधिवर्णनात्मकं स्तोत्रं नास्ति। एतत् प्रपन्नस्य सम्पूर्णजीवनस्य दार्शनिकं, आध्यात्मिकं, आचारात्मकं च स्वरूपं प्रकाशयति। प्रपत्तेः पूर्वं जीवस्य मनसि स्वस्य रक्षणविषयकः भारः भवति। प्रपत्तेः अनन्तरं सः भारः भगवति समर्पितः भवति। पूर्वं जीवः स्वस्य सामर्थ्ये, स्वस्य कर्मणि, स्वस्य ज्ञानभक्त्यादिषु चोपायेष्ववलम्बितुं प्रयतते। प्रपत्त्यनन्तरं भगवान् एव उपायः इति दृढं मन्यते। पूर्वं मोक्षः दूरस्थः साध्यरूपेण दृश्यते, प्रपत्त्यनन्तरं भगवदनुग्रहस्य फलरूपेण भगवत्प्राप्तेः विश्वासः जायते। पूर्वं आत्मनः स्वामित्वाभिमानः; अनन्तरं भगवच्छेषत्वबोधः। पूर्वं स्वार्थप्रधान-जीवनम्; अनन्तरं भगवत्कैङ्कर्यप्रधानजीवनम्।

एवमेव न्यासदशकस्थश्लोकानां स्वरूपविश्लेषणेन ज्ञायते यत् श्रीवेदान्तदेशिकस्य दृष्ट्या प्रपत्तिः केवलं एकक्षणिकं धार्मिककृत्यं न, किन्तु जीवस्यात्मस्वरूपबोधस्य, भगवदेकशरणत्वस्य, स्वकीयभार-समर्पणस्य,भगवत्प्राप्त्यभिलाषस्य,नित्यकैङ्कर्यप्रार्थनायाश्च समन्वितः आध्यात्मिकः मार्गः। प्रपत्त्या जीवः भगवति स्वस्य आत्मानं समर्पयति; भगवान् तस्य रक्षणभारं स्वयमेव स्वीकरोति, तदनन्तरं जीवः भगवच्छेषत्वेन स्वजीवनं यापयति। तस्य परमं प्रयोजनं मोक्षप्राप्तिः, मोक्षस्य परिपूर्णता तु भगवत्सन्निधौ नित्यकैङ्कर्यम्।

श्रीवेदान्तदेशिकेन प्रपत्तिविद्यायाः यत् स्वरूपं स्तोत्ररूपेण प्रकाश्यते, तत्र भक्तिः, ज्ञानम्, शरणागतिः, आत्मसमर्पणम्, भगवदनुग्रहः, कैङ्कर्यम् इत्येते सर्वे परस्परसम्बद्धाः भवन्ति। ज्ञानं भगवद्विषयकभक्तेः आधारः, भक्तिः भगवत्प्राप्तेः दीर्घसाधनरूप उपायः, प्रपत्तिः तु भगवदेकशरणत्वरूपः लघूपायः। प्रपत्तेः मूलं भगवति विश्वासः, तस्य फलम् भगवदनुग्रहः, तस्य परमपरिणामः नित्यकैङ्कर्यम्।

अतः न्यासदशकस्य स्वरूपं समग्रतया विचारयता अयं निष्कर्षः प्रतिपादयितुं शक्यते, जीवस्य वास्तविकं स्वरूपं भगवच्छेषत्वम्; भगवानेव तस्य स्वामी; भगवानेव रक्षकः भगवदनुग्रह एव तस्य मोक्षस्य निर्णायकहेतुः; भगवत्प्राप्तिरेव परमपुरुषार्थः; भगवत्सन्निधौ नित्यनिरवद्यकैङ्कर्यमेव तस्य मोक्षस्य परिपूर्णस्वरूपम्। एतादृशस्य सिद्धान्तस्य संक्षिप्तं किन्त्वत्यन्तगम्भीरं स्तोत्रात्मकं प्रतिरूपं श्रीवेदान्तदेशिकप्रणीतं न्यासदशकम् इति निःसंशयं वक्तुं शक्यते।

**संदर्भग्रन्थसूची**


1. श्रीमद्भगवदगीता (रामानुजभाष्य) ,चौखम्बा संस्कृत सीरीज़, वाराणसी, २००८
2. स्तोत्ररत्नम् (वेदान्तदेशिकप्रणीतभाष्योपेतम्), डॉ केदारप्रसाद-परोहा ,अमरग्रन्थ पब्लिकेशन विजयनगर ,दिल्ली -२००४
3. विशिष्टाद्वैत कि आचार मीमांसा, डॉ.सुमनलता, परिमल पब्लिकेशन, दिल्ली- २०००
4. श्रीमद्भागवतमहापुराण, (द्वितीय खंड ) गीताप्रेस गोरखपुर
5. ईशादि नौ उपनिषद, गीताप्रेस गोरखपुर, पन्द्रहवाँ पुनर्मुद्रण
6. महानारायणोपनिषद्, संस्कृति संस्थान, बरेली
7. श्वेताश्वतरोपनिषद्, गीताप्रेस, गोरखपुर

8. शतदूषणी (वेदान्तदेशिक) वेदान्तदेशिक ग्रन्थमाला, काञ्ची
9. अहिर्बुध्न्यसंहिता अड्यार लाइब्रेरी मद्रास।
10. विशिष्टाद्वैत वेदांत का विस्तृत विवेचन, स्वामी त्रिभुवनदास, चौखम्बा संस्कृत प्रतिष्ठान, जवाहरनगर बंगलो २०१३
11. नारदभक्तिसूत्रम्, स्वामी हर्षानन्द पूरी (संस्कृतभाषायामुनवाद), डॉ एम इ रंगाचार्य, रामकृष्णमठ बेंगलुरु , १९९३
12. Swamy Nigamantha Maha Desikan's , Nyasa Dasakam , By Vazhuthur V.Sridhar Medavakkam Chennai
13. न्यायसिद्धाञ्जनम्, वेदान्तदेशिक, टीका-नीलमेघाचारी, सम्पूर्णानन्द संस्कृत , विश्वविद्यालय, वाराणसी, १९६६
14. कठोपनिषद्, गीताप्रेस,गोरखपुर
15. शेषसंहिता, श्रीनिवासाचार्य (संशोधक), श्रीमद्राजकीय शाखामुद्रालय, मैसूरु, प्रथम संस्करण १९३५

**पाद टिप्पणी**

[1]तमेव विदित्वाऽतिमृत्युमेति । श्वेताश्वतरोपनिषद् ३.८
तमेवं विद्वान् अमृत इह भवति ।
ब्रह्मविदाप्नोति परम् । तैत्तिरीयोपनिषत् २.१.१

[2]भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।–
श्रीमद्भगवद्गीता

[3]तैलधारावदवच्छिन्नस्मृतिसन्तानरूपा भक्तिः।
न्यायसिद्धाञ्जनम्, जीवपरिच्छेदः, मोक्षहेतुनिरूपणम्
महनीयविषये प्रीतिः भक्तिः। न्यायसिद्धाञ्जनम्, जीवपरिच्छेदः, मोक्षहेतुनिरूपणम्
सा त्वस्मिन् परमप्रेमरूपा । नारदभक्तिसूत्रम्, सूत्रम् २

[4]चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ।
श्रीमद्भगवद्गीता ७.१६

[5]प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः।
श्रीमद्भगवद्गीता ७.१७
ज्ञानी त्वात्मैव मे मतम् । श्रीमद्भगवद्गीता ७.१८

[6]यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ।
श्रीमद्भगवद्गीता ७.२१
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हि तान् ।
श्रीमद्भगवद्गीता ७.२२

[7]अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्। श्रीमद्भगवद्गीता ७.२३

[8]ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना । श्रीमद्भगवद्गीता ४.२४

[9]महनीयविषये प्रीतिः भक्तिः। न्यायसिद्धाञ्जनम्, जीवपरिच्छेदः, मोक्षहेतुनिरूपणम्

[10]सा त्वस्मिन् परमप्रेमरूपा । नारदभक्तिसूत्रम् २
अमृतस्वरूपा च । नारदभक्तिसूत्रम् ३

[11]तैलधारावदवच्छिन्नस्मृतिसन्तानरूपा भक्तिः।
न्यायसिद्धाञ्जनम्, जीवपरिच्छेदः, मोक्षहेतुनिरूपणम्

[12]नान्यः पन्था विद्यतेऽयनाय । श्वेताश्वतरोपनिषत् ३.८

[13]निचाय्य तं मृत्युमाखात्प्रमुच्यते । कठोपनिषत् १.३.१५

[14]उपायः सुकरः सोऽयं दुष्करश्च मतो मम । लक्ष्मीतन्त्र १७.१०४ , न्यायसिद्धाञ्जनम्, जीवपरिच्छेदः, मोक्षहेतुनिरूपणम्

[15]आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासः गोमृत्ववरणं तथा ।
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ।
अहिबुघ्न्यसंहिता अध्याय ३७ श्लोक २८-२९

[16]प्राप्य पुण्यकृतां लोकान्नुषिष्त्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।
श्रीमद्भगवद्गीता ६.४१
अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके.......... श्रीमद्भगवद्गीता ६.४२
लभते पौर्वदेहिकम् । श्रीमद्भगवद्गीता ६.४३